# संस्कृत-वार्ता:

**दिनाङ्क:- 03.04.2024**

**प्रात:- 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री-जयपुर**

लोकसभानिर्वाचनस्य प्रथमचरणस्य मतदानस्य तिथे: पूर्वं निर्वाचनप्रचाराभियानमपि तीव्रं जातम्। प्रमुखराजनीतिकदलानां वरिष्ठनेतार: अस्मिन्चरणे सम्भविष्यमाणाय मतदानाय विभिन्नेषु राज्येषु सक्रियतया प्रचारं कुर्वन्ति। प्रमुखराजनीतिक-दलेषु भाजपेतिदलेनापि युद्धस्तरे स्वीयदलस्य प्रचारभियानं समारब्धम्। प्रधानमन्त्री अथ च भाजपेतिदलस्य वरिष्ठनेता नरेन्द्रमोदी ह्य: राजस्थानराज्ये कोटपुतली इत्यत्र प्रथमां निर्वाचनजनसभां सम्बोधितवान्। तेनोक्तं यत् यथा चतुर्दशाधिकद्विसहस्रतमे वर्षे नवदशाधिक-द्विसहस्रतमेवर्षे च भाजपेतिदलेन अस्मिन् राज्ये पञ्चविंशति आसनानि विजितानि तथैव साम्प्रतमपि भविष्यति। श्रीमोदी अवदत् यत् एतत् सामान्य-निर्वाचनं नास्ति अपितु विकसितभारत-विकसित राजस्थान इत्येतस्य निर्वाचनमस्ति। तत्रैव निर्वाचनप्रचारावधौ कांग्रेस-प्रदेशाध्यक्ष: गोविन्दसिंह-डोटासरा पूर्वमुख्यमन्त्री अशोकगहलोत: अपि च दलस्य वरिष्ठनेतार: पाली-जोधपुरयो: प्रत्याशि-नामाङ्कन-जनसभां सम्बोधितवन्त:।

**निर्वाचनायोग:-स्थानान्तरणं**

निर्वाचनायोगेन असम-बिहार-झारखण्ड-ओडिशा-आन्ध्रप्रदेश-राज्येषु कार्यरतेभ्य: आरक्षि-अधीक्षकेभ्य: जनपदाधिकारिभ्य: आरक्षि-उपमहानिरीक्षकेभ्य: इत्यादिभ्य: पदासनेभ्य: अधिकारिभ्य: स्थानान्तरणादेश: प्रख्यापित:। अयं निर्णय: मुख्य-निर्वाचनायुक्तस्य राजीवकुमारस्य अध्यक्षतायां निर्वाचनायुक्तेन ज्ञानेशकुमारेण सुखबीर-सिन्धूइत्यनेन च सह जाते उपवेशने आयोग द्वारा निरन्तर-समीक्षोपक्रमे गृहीत:। स्थानान्तरित-अधिकारिषु असमस्य उदालगिरे: जनपदाधिकारी बिहारराज्ये भोजपुर-जनपदस्य जनपदाधिकारी आरक्षि-अधीक्षक: अपि च बिहारराज्यस्यैव नवादाजनपदस्यापि जनपदाधिकारी आरक्षि-अधीक्षकश्च सम्मिलिता: सन्ति। एते अधिकारिण: स्वीय-निम्नपदकार्य रतेभ्य: प्रशासनिक अधिकारिभ्य: स्वीयपदभारं दास्यन्ति।

**अमितशाह-कर्णाटक**

भाजपेतिदलस्य वरिष्ठनेता अमितशाह ह्य: चन्नपटनाक्षेत्रे एकस्या: जनमार्गीय-प्रदर्शन्या: नेतृत्वं कृतवान् या कर्णाटके बैंगलोर-ग्रामीण-लोकसभा-क्षेत्रस्य अङ्गत्वेन-अभिज्ञायते। अस्यां मार्गीय-जनसभायां अमितशाहेन सह भाजपाप्रत्याशी डॉ. सी.एन्. मञ्जूनाथ: भाजपाप्रदेशाध्यक्ष: बी.वाई. विजयेन्द्र: अन्ये च जना: आसन्। अत्रावसरे प्रवदन् श्रीशाह: कथितवान् यत् प्रधानमन्त्रिण: नरेन्द्रमोदिन: गुजरातस्य मुख्यमन्त्रित्वेन तदनन्तरं राष्ट्रस्य प्रधानमन्त्रित्वेन त्रयोविंशतिवर्षाणां शासनं भ्रष्टाचाररहितं पवित्रम् अस्तीति। तेनोक्तं भाजपेतिदलं विकसितभारतं संवर्धयति तत्रैव इण्डीसंयुक्तदलं भ्रष्टाचारं संवर्धयति।

**कांग्रेस-लोकसभासनम्**

कांग्रेसदलेन आगामि-लोकसभा-निर्वाचनाय सप्तदश प्रतयाशीनां अन्या एकासूची अपि प्रख्यापिता। दलेन अनेन पूर्व-केन्द्रीयमन्त्रि एम्. एम्. पल्लमराजू काकीनाडा-लोकसभा-क्षेत्रात् समराङ्गणे अवतारित:। तत्रैव आन्ध्रप्रदेशस्य कांग्रेस-अध्यक्षा वाई. एस्. शर्मिलारेड्डी कडप्पा-क्षेत्रात् स्पर्धिष्यति। दलनेता जे. डी. सीलम: आन्ध्रप्रदेशस्य बापटला-लोकसभा-क्षेत्रात् निर्वाचनसमराङ्गणे अवतारित:। पूर्व-केन्द्रीयमन्त्री तारीक अनवर: बिहारराज्यस्य कटिहार-लोकसभासनात् स्पर्धिष्यते। दलेन आन्ध्रप्रदेश-विधानसभा-निर्वाचनाय चतुर्दशाधिकैकशतं ओडिशा-विधानसभा-निर्वाचनाय च नवचत्वारिंशत् प्रत्याशीनां सूची प्रख्यापिता।

**आई.पी.एल.-क्रिकेट**

आई.पी.एल. इति क्रिकेट प्रतिस्पर्धायाम्, ह्य: रात्रौ बेंगलुरु-नगरस्य एम्. चिन्नास्वामिक्रीडांगणे जातायां प्रतिस्पर्धायां लखनऊ-सुपर-जायन्ट्स-दलेन रॉयल-चैलेन्जर्स बेंगलुरुदलम् अष्टाविंशति धावनांकै: पराजितम्। अद्य विशाखापत्तनमस्य वाई.एस्. राजशेखर-रेड्डी-क्रिकेट्-क्रीडांगणे डेल्हीकैपिटल्सदलं कोलकाता-नाईट-राइडर्सदलं सम्मुखीकरिष्यति। प्रतिस्पर्धाया: अस्या: प्रसारणं सार्धसप्तवादनतो भविष्यति।

**॥ इति वार्ता: ॥**